
# ॥ नवग्रह मंण्डलम् ॥

## अधिदेवता / प्रत्यधिदेवता / पंचलोकपाल / वास्तोष्पते / क्षेत्राधिपते / दशदिक्पाल




**ब्रह्मा मुरारी त्रिपुरान्तकारी, भानु शशि भूमि-सुतो बुधश्च ।**
**गुरुश्च शुक्र शनि राहु केतव: , सर्वे ग्रहा शांति करा भवंतु ॥**

ईशान मण्डलं कृत्वा ग्रहाणां स्थापनं तत: ।
वृत मण्डल आदित्यमर्धचन्द्रं विशाकरम् ॥
त्रिकोणं मंगलं चैव बुधं च धनुषाकृतिम् ।
गुरुमष्टदलं प्रोक्तं चतुष्कोणं च भार्गवम् ॥
नराकृतिं शनिं विन्द्याद्राहुं च मकराकृतिम् ।
केतुं खड्गसमं ज्ञेयं ग्रहमण्डलके शुभा ॥

## नवग्रह नाम मन्त्रा:

| संख्या | नवग्रह | अधि देवता | प्रत्यधि देवता | पंचलोक पाल देवता | दशदिक्पाल देवता |
|---|---|---|---|---|---|
| १ | सूर्याय नम: | ईश्वराय नम: | अग्नये नम: | गणपतये नम: | इन्द्राय नम: |
| २ | सोमाय नम: | उमायै नम: | अद्भयो नम: | अम्बिकायै नम: | अग्नये नम: |
| ३ | भौमाय नम: | स्कन्दाय नम: | पृथिव्यै नम: | वायवे नम: | यमाय नम: |
| ४ | बुधाय नम: | विष्णवे नम: | विष्णवे नम: | आकाशाय नम: | निर्ऋतये नम: |
| ५ | बृहस्पतये नम: | ब्रह्मणे नम: | इन्द्राय नम: | अश्विभ्यां नम: | वरुणाय नम: |
| ६ | शुक्राय नम: | इन्द्राय नम: | इन्द्राण्यै नम: | | वायवे नम: |
| ७ | शनैश्चराय नम: | यमाय नम: | प्रजापतये नम: | | सोमाय नम: |
| ८ | राहवे नम: | कालाय नम: | सर्पेभ्यो नम: | | ईशानाय नम: |
| ९ | केतवे नम: | चित्रगुप्ताय नम: | ब्रह्मणे नम: | वास्तोष्पतये नम: | ब्रह्मणे नम: |
| १० | | | | क्षेत्राधिपतये नम: | अनन्ताय नम: |

## ॥ नवग्रह स्थापनम् पूजनम् ॥

**१. सूर्यम्**

मण्डल के मध्य में लकडी - मदार फल - द्राक्ष

- **ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च ।**
  **हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥**
- **जपा कुसुम संकाशं काश्यपेयं महाद्युतिम् ।**
  **तमोऽरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥**
- ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपस गोत्र रक्त वर्ण भो सूर्य । इहागच्छ ।
  इहतिष्ठ सूर्याय नमः । सूर्यम् आवाहयामि, स्थापयामि, पूजयामि ।

**२. चन्द्रम्**

मण्डल के अग्निकोण में लकडी - पलास फल - गन्ना

- **ॐ इमं देवाऽअसपत्क्न ७ सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्या येन्द्रस्येन्द्रियाय । इममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमो स्माकं ब्राह्मणाना ७ राजा ॥**
- **दधि शंख तुषाराभं क्षीरोदार्णव सम्भवम् ।**
  **नमामि शशिनं सोम शम्भोर्मुकुट भूषणम् ॥**
- ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयस गोत्र शुक्ल वर्ण भो चन्द्र । इहागच्छ ।
  इहतिष्ठ  चन्द्रमसे नमः । चन्द्रमसम् आवाहयामि, स्थापयामि, पूजयामि ।

**३. भौमम्**

मण्डल के दक्षिण में लकडी - खैर फल - सोपारी

- **ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ।**
  **अपा ७ रेता ७ सि जिन्वति ॥**
- **धरणी गर्भसंभूतं विद्युत्कान्ति समप्रभम् ।**
  **कुमारं शक्ति हस्तं च मंगलं प्रणमाम्यहम् ॥**
- ॐ भूर्भुवः स्वः अवन्तिकापुरोद्भव भरद्वाजस गोत्र रक्त वर्ण भो भौम । इहागच्छ ।
  इहतिष्ठ भौमाय नमः । भौमम् आवाहयामि, स्थापयामि, पूजयामि

**४. बुधम्**

मण्डल के ईशान कोण में लकडी – चिचडी फल - नारंगी

- **ॐ उद्बुध्य स्वाग्ने प्रति जागृहि त्वमिष्टा पूर्ते स ७ सृजेथा मयं च ।**
  **अस्मिन्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ॥**
- **प्रियंगु कलिका श्यामं रुपेण प्रतिमं बुधम् ।**
  **सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम् ॥**
- ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयस गोत्र हरित वर्ण भो बुध । इहागच्छ ।
  इहतिष्ठ  बुधाय नमः । बुधम् आवाहयामि, स्थापयामि, पूजयामि ।

**५. बृहस्पतिम्** मण्डल के उत्तर में लकडी - पीपल फल - निम्बु

- **ॐ बृहस्पतेऽ अति यदर्यो अर्हाद्युमद् विभाति क्रतुमज्जनेषु।**
  **यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥**
- **देवानां च ऋषीणां च गुरुं कांचन सन्निभम्।**
  **बुद्धिभूतं त्रिलोकेशं तन्नमामि बृहस्पतिम्॥**
- ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव अंगिरस गोत्र पीत वर्ण भो बृहस्पते। इहागच्छ। इहतिष्ठ बृहस्पतये नमः। बृहस्मतिम् आवाहयामि, स्थापयामि, पूजयामि।

**६. शुक्रम्** मण्डल के पूर्व में लकडी - गूलर फल - बीजोरु

- **ॐ अन्नात् परिस्त्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः।**
  **ऋतेन सत्य मिन्द्रियं विपान ७ शुक्र मन्धस इन्द्रस्येन्द्रिय मिदं पयोऽमृतं मधु॥**
- **हिम कुन्द मृणालाभं दैत्यानां परमं गुरुम्।**
  **सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम्॥**
- ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवस गोत्र शुक्ल वर्ण भो शुक्र। इहागच्छ। इहतिष्ठ शुक्राय नमः। शुक्रम् आवाहयामि, स्थापयामि, पूजयामि।

**७. शनिम्** मण्डल के पश्चिम में लकडी - शमी फल - कमल गट्टा

- **ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये। शंय्यो रभि स्त्रवन्तु नः॥**
- **नीलांजन समाभासं रविपुत्रं यमाग्रजं।**
  **छाया मार्तण्ड सम्भूतं तन्नमामि शनैश्चरम्॥**
- ॐ भूर्भुवः स्वः सौराष्ट्र देशोद्भव काश्यपस गोत्र कृष्ण वर्ण भो शनैश्चर। इहागच्छ। इहतिष्ठ शनैश्चराय नमः। शनैश्चरम् आवाहयामि, स्थापयामि, पूजयामि।

**८. राहुम्** मण्डल के नैर्ऋत्य कोण में लकडी – दुब फल - नारियल

- **ॐ कयानश्चित्र ऽ आभुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥**
- **अर्द्धकायं महावीर्यं चन्द्रादित्य विमर्दनम्।**
  **सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहम्॥**
- ॐ भूर्भुवः स्वः राठिनापुरोद्भव पैठीनस गोत्र कृष्ण वर्ण भो राहो। इहागच्छ। इहतिष्ठ राहवे नमः। राहुम् आवाहयामि, स्थापयामि, पूजयामि।

**९. केतुम्** मण्डल के वायव्य कोण में लकडी - कुशा फल - दाडिम

- **ॐ केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः॥**
- **पलाश पुष्प संकाशं तारका ग्रह मस्तकम्।**
  **रौद्रं रौद्रत्मकं घोरं तं केतु प्रणमाम्यहम्॥**
- ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिस गोत्र कृष्ण वर्ण भो केतु। इहागच्छ। इहतिष्ठ केतवे नमः। केतुम् आवाहयामि, स्थापयामि, पूजयामि।

## ॥ अधिदेवता स्थापनम् पूजनम् ॥

- विशेष पूजा, यज्ञ, अनुष्ठान, इत्यादि में नवग्रहों की स्थापना के उपरान्त सूर्य आदि ग्रहों के दाहिने (दक्षिण) की तरफ अधिदेवताओं का आवाहन एवं स्थापन करें।

१. ईश्वरम् सूर्य के दायें

**ॐ त्रयम्बकं यजामहे सुगन्धिम् पुष्टिवर्द्धनम्।**
**उर्वारुक मिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥**

- **ॐ पंचवक्त्रं वृषारुढमुमेशं च त्रिलोचनम्।**
  **आवाहयामीश्वरं ते खट्वांगवर धारिणम् ॥**
- ॐ भूर्भुवः स्वः ईश्वर इहागच्छ। इहतिष्ठ ईश्वराय नमः। ईश्वरम् आवाहयामि, स्थापयामि, पूजयामि।

२. उमाम् चंद्र के दायें

**ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रो पार्श्व नक्षत्राणि रूपमश्विनौ व्यात्तम्।**
**इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥**

- **ॐ हेमाद्रि तनयां देवीं वरदां शंकर प्रियाम्।**
  **लम्बोदरस्य जननीमुमामावाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः उमाम् इहागच्छ। इहतिष्ठ उमायै नमः। उमाम् आवाहयामि, स्थापयामि, पूजयामि।

३. स्कन्दम् मंगल के दायें

**ॐ यद क्रन्दः प्रथमं जायमानः उद्यन्त् समुद्रा दुत वा पुरीषात्।**
**श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातं ते अर्वन ॥**

- **ॐ रुद्रतेजः समुत्पन्नं देवसेनाग्रगं विभुम्।**
  **षण्मुखं कृत्तिकासूनुं स्कन्दम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः स्कन्द इहागच्छ। इहतिष्ठ स्कन्दाय नमः। स्कन्दम् आवाहयामि, स्थापयामि, पूजयामि।

४. विष्णुम् बुध के दायें

**ॐ विष्णो रराट मसि विष्णोः श्नप् त्रेस्थो विष्णोः**
**स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ॥**

- **ॐ देवदेवं जगन्नाथं भक्तानुग्रह कारकम्।**
  **चतुर्भुजं रमानाथं विष्णुम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः विष्णो इहागच्छ। इहतिष्ठ विष्णवे नमः। विष्णुम् आवाहयामि, स्थापयामि, पूजयामि।

५. ब्रह्माणम् गुरु के दायें

**ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽआवः।**
**सबुध्न्या उपमा ऽ अस्य विष्ठाः सतश्च योनिमसश्च विवः ॥**

- **ॐ कृष्णाजिनाम्बरधरं पद्मसंस्थं चतुर्मुखम् ।
वेदाधारं निरालम्बं विधिम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः ब्रह्मन इहागच्छ । इहतिष्ठ ब्रह्मणे नमः । ब्रह्माणम् आवाहयामि, स्थापयामि, पूजयामि ।

**६. इन्द्रम्** शुक्र के दायें

**ॐ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्राहा शूर विद्वान् ।
जहि शत्रु२ रप मृधो नुदस्वाथा भयं कृणुहि विश्वतो नः ॥**
- **ॐ देवराजं गजारुढं शुनासीरं शतक्रतुम् ।
वज्रहस्तं महाबाहुमिन्द्रम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः इन्द्रे इहागच्छ । इहतिष्ठ इन्द्राय नमः । इन्द्रम् आवाहयामि, स्थापयामि, पूजयामि ।

**७. यमम्** शनि के दायें

**ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा ।
स्वाहा घर्माय स्वाहा घर्मः पित्रो ॥**
- **ॐ धर्मराजं महावीर्यं दक्षिणादिक्पतिं प्रभुम् ।
रक्तेक्षणं महाबाहुं यमम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः यम इहागच्छ । इहतिष्ठ यमाय नमः । यमम् आवाहयामि, स्थापयामि, पूजयामि ।

**८. कालम्** राहु के दायें

**ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या ऽ उन्नयामि ।
समापो ऽ अद्भिरग्मत समोषधी भिरोषधीः ॥**
- **ॐ अनाकारमनन्ताख्यं वर्त्तमानं दिने दिने ।
कलाकाष्ठादि रुपेण कालम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः काले इहागच्छ । इहतिष्ठ कालाय नमः । कालम् आवाहयामि, स्थापयामि, पूजयामि ।

**९. चित्रगुप्तम्** केतु के दायें

**ॐ चित्रावसो स्वस्ति ते पारमशीय ॥**
- **ॐ धर्मराज सभासंस्थं कृता कृत विवेकिनम् ।
आवाहयेच्चित्रगुप्तं लेखनी पत्र हस्तकम् ॥**
- ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ । इहतिष्ठ चित्रगुप्ताय नमः । चित्रगुप्तम् आवाहयामि, स्थापयामि, पूजयामि ।

## ॥ प्रत्यधि देवता स्थापनम् पूजनम् ॥

- नवग्रहों के बायीं ओर प्रत्यधि देवताओं का आवाहन स्थापन एवं पूजन करें।

**१. अग्निम्** सूर्य के बायें

**ॐ अग्निदूतं पुरो दधे हव्यवाहमु प ब्रुवे।**
**देवाँ २ ऽआसादयादिह॥**

- **ॐ रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम्।**
  **वरदाभयदं देवमग्निम् आवाहयाम्यहम्॥**
- ॐ भूर्भुवः स्वः अग्ने इहागच्छ। इहतिष्ठ अग्नये नमः। अग्निम् आवाहयामि, स्थापयामि, पूजयामि।

**२. आपः** चन्द्र के बायें

**ॐ आपो हिष्ठा मयोभुवस्तानऽ ऊर्जे दधातन। महेरणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः। तस्माऽ अरङ्गमामवो यस्य क्षयाय जिन्वथ आपो जनयथा च नः॥**

- **ॐ आदि देव समुद्भूता जगच्छूद्धिकराः शुभाः।**
  **औषध्याप्यायनकरा अपाम् आवाहयाम्यहम्॥**
- ॐ भूर्भुवः स्वः अप इहागच्छ। इहतिष्ठ अद्भयो नमः। अप आवाहयामि, स्थापयामि, पूजयामि।

**३. पृथ्वीम्** मंगल के बायें

**ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी।**
**यच्छा नः शर्म स प्रथाः॥**

- **ॐ शुक्लवर्णां विशालाक्षीं कूर्मपृष्ठोपरिस्थिताम्।**
  **सर्वशस्याश्रयां देवीं धराम् आवाहयाम्यहम्॥**
- ॐ भूर्भुवः स्वः पृथिवि इहागच्छ। इहतिष्ठ पृथिव्यै नमः। पृथिवीम् आवाहयामि, स्थापयामि, पूजयामि।

**४. विष्णुम्** बुध के बायें

**ॐ इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम्।**
**समूढमस्य पा ७ सुरे स्वाहा॥**

- **ॐ शंख चक्र गदा पद्म हस्तं गरुडवाहनम्।**
  **किरीट कुण्डलधरं विष्णुम् आवाहयाम्यहम्॥**
- ॐ भूर्भुवः स्वः विष्णो इहागच्छ। इहतिष्ठ विष्णवे नमः। विष्णुम् आवाहयामि, स्थापयामि, पूजयामि।

**५. इन्द्रम्** गुरु के बायें

**ॐ त्रातारमिन्द्र मवितार मिन्द्र ७ हवे हवे सुहव ७ शूरमिन्द्रम्।**
**ह्वायामि शक्रम्पुरुहूतमिन्द्र ७ स्वस्ति नो मघवा धात्विन्द्रः॥**

- **ॐ एरावद गजारुढं सहस्त्राक्षं शचीमतिम् ।**
  **वज्रहस्तं सुराधीशमिन्द्रम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः इन्द्र इहागच्छ । इहतिष्ठ इन्द्राय नमः । इन्द्रम् आवाहयामि, स्थापयामि, पूजयामि ।

**६. इन्द्राणीम्** शुक्र के बायें

**ॐ अदित्यै रास्ना सीन्द्राण्या ऽउष्णीषः ।**
**पूषाऽसि घर्माय दीष्व ॥**

- **ॐ प्रसन्न वदनां दर्वी देवराजस्य वल्लभाम् ।**
  **नानालंकार संयुक्तां शचीम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः इन्द्राणि इहागच्छ । इहतिष्ठ इन्द्राण्यै नमः । इन्द्राणीम् आवाहयामि, स्थापयामि, पूजयामि ।

**७. प्रजापतिम्** शनि के बायें

**ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ।**
**यत्कामास्ते जुहुमस्तन्नो ऽअस्तु वय ७ स्याम पतयो रयीणाम् ॥**

- **ॐ आवाहयाम्यहं देव देवेशं च प्रजापतिम् ।**
  **अनेक व्रत कर्तारं सर्वेषां च पितामहम् ॥**
- ॐ भूर्भुवः स्वः प्रजापते इहागच्छ । इहतिष्ठ प्रजापतये नमः । प्रजापतिम् आवाहयामि, स्थापयामि, पूजयामि ।

**८. सर्प** राहु के बायें

**ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु ।**
**येऽ अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥**

- **ॐ अनन्ताद्यान् महाकायान् नानामणि विराजितान् ।**
  **आवाहयाम्यहं सर्पान् फणासप्तकमण्डितान् ॥**
- ॐ भूर्भुवः स्वः सर्पा इहागच्छ । इहतिष्ठ सर्पेभ्यो नमः । सर्पम् आवाहयामि, स्थापयामि, पूजयामि ।

**९. ब्रह्मा** केतु के बायें

**ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचो वेनऽ आवः ।**
**सबुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥**

- **ॐ हंसपृष्ठ समारुढं देवता गण पूजितम् ।**
  **आवाहयाम्यहं देवं ब्रह्माणं कमलासनम् ॥**
- ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ । इहतिष्ठ ब्रह्मणे नमः । ब्रह्माणम् आवाहयामि, स्थापयामि, पूजयामि ।

## ॥ पंच लोकपाल देवता पूजनम् ॥

- **गणेश अम्बिका वायु आकाश अश्विनौ तथा । ग्रहाणांमुत्तरे पंच लोकपालाः प्रकीर्तिताः ॥**

**१. गणेश** राहु के उत्तर

**ॐ गणानान्त्वा गणपति ७ हवामहे प्रियाणान्त्वां प्रियपति ७ हवामहे निधी नान्त्वा निधिपति ७ हवामहे व्वसो मम आहमजानि गर्भधमात्त्वमजासि गर्भधं ॥**

- **ॐ लम्बोदरं महाकायं गजवक्त्रं चतुर्भुजम् । आवाहयाम्यहम् देवं गणेशं सिद्धिदायकम् ॥**
- ॐ भूर्भुवः स्वः गणपते इहागच्छ । इहतिष्ठ गणपतये नमः । गणपतिम् आवाहयामि, स्थापयामि, पूजयामि ।

**२. दुर्गा** शनि के उत्तर

**ॐ अम्बेऽ अम्बिकेऽ अम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥**

- **ॐ पत्तने नगरे ग्रामे विपिने पर्वते गृहे । नानाजाति कुलेशानीं दुर्गाम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः दुर्गे इहागच्छ । इहतिष्ठ दुर्गायै नमः । दुर्गाम् आवाहयामि, स्थापयामि, पूजयामि ।

**३. वायु** सूर्य के उत्तर

**ॐ आ नो नियुद्भिःशतिनीभिरध्वर ७ सहश्रिणीभिरुपयाहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥**

- **ॐ आवाहयाम्यहं वायुं भूतानां देहधारिणम् । सर्वाधारं महावेगं मृगवाहनमीश्वरम् ॥**
- ॐ भूर्भुवः स्वः वायो इहागच्छ । इहतिष्ठ वायवे नमः । वायुम् आवाहयामि, स्थापयामि, पूजयामि ।

**४. आकाश** शुक्र के पूर्व

**ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ॥**

- **ॐ अनाकारं शब्दगुणां द्यावाभूम्यन्तरस्थितम् । आवाहयाम्यहं देवमाकाशं सर्वगं शुभम् ॥**
- ॐ भूर्भुवः स्वः आकाश इहागच्छ । इहतिष्ठ आकाशाय नमः । आकाशम् आवाहयामि, स्थापयामि, पूजयामि ।

**५. अश्विनी** ग्रह के उत्तर

**ॐ यावां कशा मधु मत्य अश्विना सूनृतावती । तया यज्ञं मिमिक्षत ॥**

- **ॐ देवतानां च भैषज्ये सुकुमारौ भिषग्वरौ । आवाहयाम्यहं देवावश्विनौ पुष्टि वर्द्धनौ ॥**
- ॐ भूर्भुवः स्वः अश्विनौ इहागच्छ । इहतिष्ठ अश्विभ्याम् नमः । अश्विनौ आवाहयामि, स्थापयामि, पूजयामि ।

## ॥ वास्तष्पतेः क्षेत्राधिपतेर्दशदिक्पालानाम् च पूजनम् ॥

- नवग्रह मण्डल के बाहर दशदिक्पाल का आवाहन करें।

  - रुद्रा वह्निः पितृपति नैऋतो वरुणे मरुत्।
    कुबेर ईशो ब्रह्मा च ह्यनन्तो दश दिक्पतिः॥

- **वास्तोष्पतिम्** गुरत्तरे
  ॐ वास्तोष्पते प्रति जानीह्यस्मान् स्वावेशो अनमीवा भवो नः।
  यत्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे॥
  - वास्तोष्पतिं विदिक् कार्यं भूशय्या भिरतं प्रभुम्।
    आवाहयाम्यहं देवं सर्व कर्म फल प्रदम्॥
  - ॐ भूर्भुवः स्वः वास्तोष्पते इहागच्छ। इहतिष्ठ वास्तोष्पतये नमः। वास्तोष्पतिम् आवाहयामि, स्थापयामि, पूजयामि।

- **क्षेत्राधिपतिम्** गुरत्तरे
  ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात् पुर एतारमग्नेः।
  एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः॥
  - ॐ भूतप्रेत पिशाचाद्यैरावृतं शूल पाणिनम्।
    आवाहये क्षेत्रपालं कर्मण्यस्मिन् सुखाय नः॥
  - ॐ भूर्भुवः स्वः क्षैत्राधिपते इहागच्छ। इहतिष्ठ क्षेत्राधिपतये नमः। क्षेत्राधिपतिम् आवाहयामि, स्थापयामि, पूजयामि।

१. **इन्द्र** पूर्व
ॐ त्रातार मिन्द्र मवितार मिन्द्र ७ हवे हवे सुहव ७ शूरमिन्द्रम्।
ह्वयामि शक्रम् पुरुहूतमिन्द्र ७ स्वस्ति नो मघवा धात्विन्द्रः॥
- ॐ इन्द्रम् सुरपतिश्रेष्ठं वज्रहस्तं महाबलम्।
  आवाहये यज्ञसिद्धयै शत यज्ञाधिपं प्रभुम्॥
- ॐ भूर्भुवः स्वः इन्द्र इहागच्छ। इहतिष्ठ इन्द्राय नमः। इन्द्रम् आवाहयामि, स्थापयामि, पूजयामि।

२. **अग्नि** अग्नि
ॐ त्वन्नोऽ अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य।
त्राता तोकस्य तनये गवामस्य निमेष ७ रक्षमाणस्तव व्रते॥
- ॐ त्रिपादं सप्तहस्तं च द्विमूर्द्धानं द्विनासिकम्।
  षण्नेत्रं च चतुः श्रोत्रमग्निम् आवाहयाम्यहम्॥
- ॐ भूर्भुवः स्वः अग्ने इहागच्छ। इहतिष्ठ अग्नये नमः। अग्निम् आवाहयामि, स्थापयामि, पूजयामि।

| | | |
|---|---|---|
| ३. यम | दक्षिण | **ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा।<br>स्वाहा घर्माय स्वाहा घर्म पित्रे॥**<br>▪ **ॐ महा महिष मारुढं दण्ड हस्तं महाबलम्।<br>यज्ञसंरक्षणार्थाय यमम् आवाहयाम्यहम्॥**<br>▪ ॐ भूर्भुवः स्वः यम इहागच्छ। इहतिष्ठ यमाय नमः। यमम् आवाहयामि, स्थापयामि, पूजयामि। |
| ४. नैऋत्य | नैर्ऋत्य | **ॐ असुन्नवन्तमयजमानमिच्छ स्तेन- स्येत्यामन्विहितस्करस्य।<br>अन्यमस्मदिच्छ- सात ऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु॥**<br>▪ **ॐ सर्वप्रेताधिपं देवं निर्ऋतिं नील विग्रहम्।<br>आवाहये यज्ञ सिद्धयै नरारुढं वरप्रदम्॥**<br>▪ ॐ भूर्भुवः स्वः निर्ऋते इहागच्छ। इहतिष्ठ निर्ऋतये नमः। निर्ऋतिम् आवाहयामि, स्थापयामि, पूजयामि। |
| ५. वरुण | पश्चिम | **ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।<br>अहेडमानो वरुणेह बोध्युरूश ७ समानऽ आयुः प्रमोषीः॥**<br>▪ **ॐ शुद्धस्फटिक संकाशं जलेशं यादसां पतिम्।<br>आवाहये प्रतीचीशं वरुणं सर्वकामदम्॥**<br>▪ ॐ भूर्भुवः स्वः वरुण इहागच्छ। इहतिष्ठ वरुणाय नमः। वरुणम् आवाहयामि, स्थापयामि, पूजयामि। |
| ६. वायु | वायव्य | **ॐ आ नो नियुद्भिः शतिनीभिरध्वर ७ सहस्त्रिणी भिरुपया हियज्ञम्।<br>वायोऽ अस्मिन्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥**<br>▪ **ॐ मनोजवं महातेजं सर्वतश्चरिणं शुभम्।<br>यज्ञ संरक्षणार्थाय वायुम् आवाहयाम्यहम्॥**<br>▪ ॐ भूर्भुवः स्वः वायो इहागच्छ। इहतिष्ठ वायवे नमः। वायुम् आवाहयामि, स्थापयामि, पूजयामि। |
| ७. सोम | उत्तर | **ॐ वय ७ सोमव्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि॥**<br>▪ **ॐ आनाहयामि देवेशं धनदं यक्ष पूजितम्।<br>महाबलं दिव्य देहं नरयानगतिं विभम्॥**<br>▪ ॐ भूर्भुवः स्वः सोम इहागच्छ। इहतिष्ठ सोमाय नमः। सोमम् आवाहयामि, स्थापयामि, पूजयामि। |

८. ईशान ईशान

**ॐ तमीशानं जगतस् तस्थु षस्पतिं धियं जिन्वम वसे हूमहे वयम्।**
**पूषा नो यथा वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥**

- **ॐ सर्वाधिपं महादेवं भूतानां पतिमव्ययम्।**
  **आवाहये तमीशानं लोकानामभय प्रदम्॥**
- ॐ भूर्भुवः स्वः ईशान इहागच्छ। इहतिष्ठ ईशानाय नमः। ईशानम् आवाहयामि, स्थापयामि, पूजयामि।

९. ब्रह्मा पूर्व-ईशान

**ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः।**
**यश ७ सते स्तुवते धायि वज्रऽ इन्द्र ज्येष्ठाऽ अस्माँऽ अवन्तु देवाः॥**

- **ॐ पद्मयोनिं चतुर्मूर्तिं वेदगर्भं पितामहम्।**
  **आवाहयामि ब्रह्माणां यज्ञ संसिद्धिहेतवे॥**
- ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ। इहतिष्ठ ब्रह्मणे नमः। ब्रह्माणम् आवाहयामि, स्थापयामि, पूजयामि।

१०.अनन्त नैर्ऋत्य-पश्चिम

**ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी।**
**यच्छा नः शर्म सप्रथाः॥**

- **ॐ अनन्तं सर्वनागानामधिपं विश्व रुपिणाम्।**
  **जगतां शान्तिकर्तारं मण्डले स्थापयाम्यहम्॥**
- ॐ भूर्भुवः स्वः अनन्त इहागच्छ। इहतिष्ठ अनन्ताय नमः। अनन्तम् आवाहयामि, स्थापयामि, पूजयामि।

- हस्ते अक्षतानादाय मनोजूतिरीति मन्त्रेण नवग्रह अधिदेवता, प्रत्यधिदेवता, विनायकादि पंचलोकपाल वास्तोष्पति क्षेत्राधिपती इन्द्रादि दशदिक्पाल सहितः सुप्रतिष्ठिता वरदाः भवन्तु।
- इति प्रतिष्ठाप्य नाममन्त्रैः पुरुषुक्तेन वा षोडषोपचारैः सम्पूजयेत्।

- पुष्पांजलि

**आदित्यचन्द्रौ कुजसौम्यजीव-श्रीशुक्रसूर्यात्मजराहुकेतून्।**
**नमामि नित्यं शुभदायकास्ते भवन्तु मे प्रीतिकराश्च सर्वे॥**

- **सूर्यः शौर्य मथेन्दु रूच्च पदवीं सन्मङ्गलं मङ्गलः।**
  **सद्बुद्धिञ्च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः॥**
- **राहु र्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं।**
  **नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहा :॥**
- **आयुश्च वित्तञ्च तथा सुखं च धर्मार्थलाभौ बहुपुत्रतां च। शत्रुक्षयं राजसु पूज्यतां च तुष्टा ग्रहाः क्षेमकरा भवन्तु॥**

- अनेन नवग्रह मण्डलस्थ सूर्यादि देवानां पूजनेन ग्रहमण्डलस्थाः सर्वे सूर्यादि देवताः प्रीयन्तां न मम।

**॥ इति आवाहित सूर्याद्यनन्तान्त देवानाम् आवाहनम् स्थापनम् पूजनम् समाप्तम्॥**

- **प्रकारान्तरम्** वृतमण्डलमादित्यं चतुरस्त्रं निशाकरम् । त्रिकोणं मंगलं चैव बुधं वै बाण सन्निभम् ॥
  गुरवे पट्टिशाकारं पचंकाणं भृगुं तथा । मन्दे च धनुषाकारं सुर्पाकारं तु राहवे ॥
  केतवे च ध्वजाकारं मण्डलानि क्रमेण तु । शुक्रार्कौ प्राङ्मुखो ज्ञेयौ गुरु सौम्यावुदंमुखो ॥
  प्रत्यङ्मुखो शनि सोमो शेषा दक्षिणतो मुखाः । मध्ये तु भास्करं दिन्द्याच्छाशिनं पूर्वदक्षिणे ॥
  दक्षिणे लोहितं विन्द्याद् बुधं पूर्वोत्तरेण तु । उत्तरेण गुरुं विन्द्यात् पूर्वेणैव तु भार्गवम् ॥
  पश्चिमे तु शनिं विन्द्याद्राहुं दक्षिण पश्चिमे । पश्चिमोत्तरतः केतुं इत्येषा ग्रहसंस्थितिः ॥
  आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः । अधिदेवता दक्षिणे वामे प्रत्यधिदेवताः ॥
  अरुणौ सूर्य भौमो च श्वेतौ शुक्रनिशाकरौ । हरितवर्णो बुधश्चैव पीतवर्णो गुरुस्तथा ॥
  कृष्णवर्णाः शनि राहु केतवस्तु तथैव च ।